सत्यं शिवमानम्

**WEST BENGAL STATE UNIVERSITY**

B.A. Honours 6th Semester Examination, 2023

## SANACOR13T-SANSKRIT (CC13)

## ONTOLOGY AND EPISTEMOLOGY

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम् ।

### SECTION-A

**(Marks: 10)**

1. अधो लिखितेषु यथेच्छं ***पञ्चप्रश्नाः*** समाधेयाः । 2×5 = 10

(क) भारतीयदर्शनसम्प्रदायेषु के तावत् आस्तिकाः भवन्ति ?

(ख) आरम्भवाद इति नामकरणे किं कारणम् ? आरम्भवादं के स्वीकुर्वन्ति ?

(ग) भारतीयदर्शने द्वैतवादस्य कः आशयः ? द्वैतवादस्य प्रतिष्ठाता कः आसीत् ?

(घ) भारतीयदर्शने सत्कार्यवादं के अङ्गीकुर्वन्ति ? सत्कार्यवादस्य कः आशयः ?

(ङ) जैनमते रत्नत्रयं किम् ?

(च) स्वभाववादस्य प्रवक्तारः के सन्ति ? वादस्यास्य कः आशयः ?

(छ) भारतीयदर्शने एकत्ववादस्य प्रवक्ता कः आसीत् ? अस्य दर्शनस्य मुख्यो विषयः को वर्तते ?

### SECTION-B

**(Marks: 20)**

2. अधो लिखितेषु प्रश्नेषु ***यथेच्छमेकः*** प्रश्नः समाधेयः । 10×1 = 10

(क) किं नाम सामान्यम् ? तर्कसंग्रहानुसारेण सामान्यस्य लक्षणमालोच्यताम् । कथं सामान्यं पदार्थत्वेन स्वीक्रियते ? 2+5+3

(ख) को नाम अभावः ? तस्य कति भेदाः ? यथेच्छं भेदद्वयमाश्रित्य वैशद्येन आलोच्यताम् । 2+2+6

(ग) तर्कसंग्रहनये कति गुणाः ? गुणेषु यथेच्छं त्रयमाश्रित्य समासेन विचारः क्रियताम् । 2+8

3. (क) अधो लिखितेषु यथेच्छं ***विषयद्वयमाश्रित्य*** टीकां लिखत । 5×2 = 10

आत्मा, मनः, विशेषः ।

अथवा

(ख) अधो लिखितेषु यथेच्छं ***द्वयमाश्रित्य*** व्याख्यां लिखत। 5×2 = 10

(i) तत्र गन्धवती पृथिवी।

(ii) संयोगनाशको गुणो विभागः।

(iii) शब्दगुणकमाकाशम्।

## SECTION-C

**(Marks: 20)**

4. अधो लिखितेषु ***यथेच्छमेकः*** प्रश्नः समाधेयः। 10×1 = 10

(क) तर्कसंग्रहानुसारं कारणकरणयोः पार्थक्यं वैशद्येन लिखत। 10

(ख) अनुमितिकरणं किम् ? तस्य कस्तावद्व्यापारः ? स्वार्थानुमानपरार्थानुमानयोः पार्थक्यं वैशद्येन प्रदर्श्यताम्। 2+2+6

(ग) व्याप्तिस्वरूपं तर्कसंग्रहमाश्रित्य संक्षेपेण वर्णनीयम्। व्याप्तेः कति भेदाः ? 8+2

5. (क) अधो लिखितेषु यथेच्छं ***विषयद्वयमाश्रित्य*** टीकां लिखत। 5×2 = 10

स्मृतिः, उपमितिः, प्रत्यक्षम्

अथवा

(ख) अधो लिखितेषु यथेच्छं ***द्वयमाश्रित्य*** व्याख्यां लिखत। 5×2 = 10

(i) आप्तवाक्यं शब्दः।

(ii) सन्दिग्धसाध्यवान् पक्षः।

(iii) कार्यं प्रागभावप्रतियोगि।

——×——

लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 6th Semester Examination, 2023

## SANADSE04T-SANSKRIT (DSE3/4)

## VEDA AND VYAKARANA

Time Allotted: 2 Hours                                                    Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरलिप्या च देयम्।

### क-विभागः

1. यथेच्छम् ***एकः*** प्रश्नः समाधेयः। 10×1 = 10

(क) वैदिकवाङ्मये ऋषेः अरविन्दस्य अवदानम् आश्रित्य समासेन एकः प्रबन्धो विरच्यताम्।

(ख) वैदिकसाहित्येषु प्रतिबिम्बितं समाजजीवनम् आधारीकृत्य समासेन एको निबन्धो विरच्यताम्।

### ख-विभागः

2. अधो लिखितेषु प्रश्नेषु यथेच्छं ***पञ्च*** प्रश्नाः समाधेयाः। 2×5 = 10

(क) भाषाविज्ञानमित्यस्य कोऽर्थः ?

(ख) संगणकीयभाषाविज्ञाने पाणिनीयव्याकरणस्य गुरुत्वं द्वित्रैः वाक्यैः लेख्यम्।

(ग) NLP-इत्यस्य सम्पूर्णं नाम विलिख्यार्थो निर्णेयः।

(घ) Lexical Resources इत्यस्य कोऽर्थः ?

(ङ) भाषाप्रक्रियाकरणे पदविश्लेषकोपादानस्य (Morphological Analyzer) गुरुत्वं लेख्यम्।

(च) भाषाप्रक्रियाकरणे तिङन्तनिर्मापकोपादानस्य (Tinganta Analyzer) गुरुत्वं लेख्यम्।

(छ) Unicode-इति किम् ?

(ज) Lexical Resources इत्यस्योपयोगः कः ?

### ग-विभागः

3. अधःप्रदत्तेषु विषयेषु यथेच्छं ***विषयद्वयमाश्रित्य*** टीकां लिखत। 5×2 = 10

(क) निरुक्तकारः यास्कः

(ख) सायणः

(ग) म्याक्समूलारः

(घ) उल्डेनवार्गः

## घ-विभागः

4. *यथेच्छमेकः* प्रश्नः समाधेयः। 10×1 = 10

(क) भट्टिकाव्यस्य द्वितीयसर्गमाधारीकृत्य शरदः सौन्दर्यं समासेन वर्णयत।

(ख) भट्टिकाव्यस्य द्वितीयसर्गे रामेण राक्षसानां निधनं यथा वर्णितं तथा वैशद्येन वर्ण्यताम्।

5. यथेच्छं ***श्लोकद्वयं*** व्याख्येयम्। 5×2 = 10

(क) तरङ्गसङ्गाच्चपलैः पलाशै-
ज्वालाश्रियं साऽतिशयं दधन्ति।
सधूमदीप्ताऽग्निरुचीनि रेजुस्-
ताम्रोत्पलान्याकुलषट्पदानि॥

(ख) वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः।
परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवाऽऽदरेण॥

(ग) लतानुपातं कुसुमान्यगृह्णात्
स नद्यवस्कन्दमुपास्पृशच्च।
कुतूहलाच्चारुशिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्त॥

(घ) सितारविन्दप्रचयेषु लीनाः
संसक्तफेणेषु च सैकतेषु।
कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः॥

——×——

लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Programme 6th Semester Examination, 2023

## SANGDSE04T-SANSKRIT (DSE2)

### VYAKARANA AND KAVYA

Time Allotted: 2 Hours Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु ***पञ्च*** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः — 2×5 = 10

(क) NLP-इत्यस्य सम्पूर्णं नाम विलिख्यार्थो निर्णेयः।

(ख) पदपरिचायकं (postagger) किम्?

(ग) रूपमूलं (Morpheme) किम्?

(घ) पाणिनीयः अक्षरसमाम्नायः (Phonetic component) लेख्यः।

(ङ) भाषाप्रक्रियाकरणे सुबन्तनिर्मापकोपादानस्य गुरुत्वं लेख्यम्।

(च) Computational lexicology इत्यस्य कोऽर्थः?

(छ) Unicode – इति किम्?

2. अधोलिखितेषु ***द्वयम्*** आश्रित्य टीका लेख्या — 5×2 = 10

(क) Unicode

(ख) Semantics

(ग) Morphological Analyzer

(घ) Discourse

### SECTION-B

3. यथेच्छं ***प्रश्नद्वयं*** समाधेयम् — 10×2 = 20

(क) काव्यालंकारसूत्रवृत्तिमनुसृत्य काव्यस्य भेदाः आलोच्यन्ताम्।

(ख) वामननये काव्यस्यात्मा कः? तद्विषये प्रबन्धः लेख्यः।

(ग) वामनमते कानि तावत् काव्याङ्गानि? काव्याङ्गेषु द्वयोः सविशदमालोचना विधेया।

(घ) काव्यं कथंमुपादेयं भवति? वामनदिशा सविशदं प्रतिपादनीयम्।

4. अधोलिखितेषु ***सूत्रद्वयं*** संस्कृतभाषया देवनागरीलिप्या च व्याख्येयम् — 5×2 = 10

(क) सौन्दर्यमलङ्कारः

(ख) न कतकं पङ्कप्रसादनाय

(ग) कवित्वबीजं प्रतिभानम्

(घ) शब्दस्मृतेः शब्दशुद्धिः।

——×——

सत्यं शिवमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Programme 6th Semester Examination, 2023

## SANGDSE03T-SANSKRIT (DSE2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः

1. अधोलिखितेषु ***एकः*** प्रश्नः समाधेयः। 10×1 = 10

(क) वेदव्याख्यानविषये सत्यव्रतसामश्रमिमहोदयस्य अवदानं वर्णयत।

(ख) दुर्गामोहनभट्टाचार्यस्य वेदव्याख्यानमार्गे अवदानं स्वकीयभाषया लिखत।

2. अधोलिखितेषु यथेच्छं ***पञ्चानां*** प्रश्नानां संस्कृतभाषया देवनागरलिप्या च टिप्पणी लेख्या — 2×5 = 10

(क) अनिर्वाणः।

(ख) रमेशचन्द्रदत्तः।

(ग) दयानन्दसरस्वती।

(घ) हरप्रसादशास्त्री।

(ङ) राजेन्द्रलालमित्रः।

(च) हलायुधः।

(छ) ऐतरेयालोचनम्।

### ख-विभागः

3. अधोनिर्दिष्टेषु ***एकः*** प्रश्नः समाधेयः। 10×1 = 10

(क) गौडीयवैष्णवदर्शनस्य साध्य-साधनतत्त्वं वैशद्येन लिख्यताम्।

(ख) वङ्गीयशाक्तदर्शने रामप्रसादस्य अवदानं विशदीकुरु।

(ग) शक्तिसाधनया रामकृष्णदेवः कीदृशः प्रभावितोऽभवदिति विशदीकुरु।

4. अधोलिखितेषु यथेच्छं ***पञ्चानां*** विषयाणां टिप्पणी विधेया। [ तेषु यथेच्छं ***प्रश्नद्वयस्य*** उत्तरं संस्कृतभाषया देवनागरलिप्या च विधेया ] 4×5 = 20

(क) स्वामिविवेकानन्दस्य कर्मयोगः।

(ख) अचिन्त्यभेदाभेदतत्त्वम्।

(ग) पञ्चाननतर्करत्नः।

(घ) कमलाकान्तः।

(ङ) सदाशिवतत्त्वम्।

(च) ज्ञानदासः।

———×———

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 6th Semester Examination, 2023

## SANADSE06T-SANSKRIT (DSE3/4)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A
**(Marks: 20)**

1. अधोलिखितयो ***एकः*** प्रश्नः समाधेयः। 10×1 = 10

(क) का खलु रीतिः ? काव्यनिर्माणे रीतेः भूमिका सविशदम् उल्लेखनीया।

(ख) शब्दगुणाः कतिविधाः ? तेषु गुणत्रयं सलक्षणं विशदीक्रियताम्।

2. अधोलिखितेषु प्रश्नेषु यथेच्छं ***पञ्च*** प्रश्नाः समाधेयाः। 2×5 = 10

(क) कानि खलु काव्याङ्गानि ?

(ख) अरोचकी इति पदस्य कोऽर्थः ?

(ग) कान्तिगुणस्य लक्षणं दीयताम्।

(घ) वामनकृतम् अलङ्कारसूचकं लक्षणद्वयं लिख्यताम्।

(ङ) काव्याङ्गरूपेण प्रकीर्णस्य स्वरूपम् उल्लेख्यम्।

(च) विद्या कतिविधा ?

(छ) प्रतिभायाः स्वरूपं उल्लेखनीयम्।

### SECTION-B
**(Marks: 30)**

3. अधोलिखितयोः ***एकः*** प्रश्नः समाधेयः। 10×1 = 10

(क) भट्टिकाव्यस्य द्वितीयसर्गमवलम्ब्य शरदः वर्णना सविस्तारं लेखनीया।

(ख) दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्
हस्तामर्ष इवान्धानां भवेद् व्याकरणादृते ॥
— उक्तिरियं सविशदं व्याख्येया।

4. अधोदत्तेषु यथेच्छं ***द्वयं*** व्याख्येयम्। 5×2 = 10

(क) दत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः।
आकर्णयन्नुत्सुकहंसनादान्
लक्ष्ये समाधिं न दधे मृगावित्॥

(ख) निशातुषारैर्नयनाम्बुकल्पैः
पत्रान्तपर्यागलदच्छविन्दुः।
उपारूरोदेव नदत्पतङ्गः
कुमुद्वतीं तीरतरुर्दिनादौ॥

(ग) वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः।
परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण॥

(घ) सितारविन्दप्रचयेषु लीनाः
संसक्तफेनेषु च सैकतेषु।
कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः॥

5. अधोनिर्दिष्टं ***विषयद्वयमाश्रित्य*** टीका लेख्या। 5×2 = 10

काकुत्स्थः, मैथिली, विश्वामित्रः, बलिः।

———×———

लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Programme 6th Semester Examination, 2023

## SANGGEC02T-SANSKRIT (GE2)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः

1. अधोदत्तेषु प्रश्नेषु ***यथेच्छमेकः*** समाधेयः। 10×1 = 10

(क) वैदिकयुगे नार्य्याः स्थानं कीदृशमासीदिति विषयमवलम्ब्य कश्चन निबन्धो लेख्यः।

(ख) किं नाम संवादसूक्तम् ? ऋग्वेदस्य संवादसूक्तानि आश्रित्य कश्चन निबन्धो लेख्यः।

2. अधोलिखितेषु यथेच्छं ***विषयमेकमाश्रित्य*** टिप्पणी कार्या। 5×1 = 5

(क) अथर्ववेदः

(ख) निरुक्तम्

(ग) आरण्यकम्

### ख-विभागः

3. अधोलिखितेषु प्रश्नेषु यथेच्छं ***पञ्च-प्रश्नाः*** संस्कृतेन देवनागर्या लिप्या च समाधेयाः। 2×5 = 10

(क) पुराणशब्दस्य कोऽर्थः ?

(ख) राजसपुराणानि कानि ?

(ग) नाट्यशास्त्रस्य लक्षणं कस्मिन् पुराणे उपलभ्यते ?

(घ) पुराणस्य भागद्वयं किम् ?

(ङ) पुराणेतिहासयोः को भेदः ?

(च) पुराणलक्षणं किम् ?

(छ) विष्णोः कति अवताराः सन्ति ?

4. अधोलिखितेषु यथेच्छं ***विषयद्वयमाश्रित्य*** संस्कृतेन देवनागरलिप्या च टिप्पणी कार्या। 5×2 = 10

(क) अग्निपुराणम्  (ख) मन्वन्तरम्  (ग) लिङ्गपुराणम्।

## ग-विभागः

5. (क) पदार्थः कः ? वैशेषिकदर्शनमते पदार्थाः कति ? के च ते ? संक्षेपेण तान् आलोचयतु। 10

अथवा

(ख) सांख्यप्रतिपादितं सृष्टितत्त्वं समासेन व्याख्यायताम्। 10

6. अधोदत्तेषु विषयेषु ***यथेच्छमेकमाश्रित्य*** टीका लेखा। 5×1 = 5

(क) आत्मा।

(ख) अद्वैतवेदान्तानुसारतः प्रमाणतत्त्वम्।

(ग) अष्टाङ्गिकमार्गः।

——×——

सत्यं शिवमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 6th Semester Examination, 2023

## SANACOR14T-SANSKRIT (CC14)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च लेख्यम्

### SECTION-A

1. अधोलिखितेषु ***पञ्च*** प्रश्नाः समाधेयाः। 2×5 = 10

(क) कर्मसंज्ञाविधायकं सूत्रं सोदाहरणं लिखत।

(ख) कर्तरि करणे च तृतीयायाः उदाहरणं ससूत्रं लिखत।

(ग) सम्प्रदानमित्यस्य कः अर्थः ? उदाहरणयोगेन स्पष्टीक्रियताम्।

(घ) व्याघ्राद् बिभेति – इत्यत्र कथं पञ्चमी ?

(ङ) अधिकरणं कतिविधम् ? सोदाहरणं निर्दिशत।

(च) ससूत्रं शतृप्रत्ययस्य उदाहरणं दीयताम्।

(छ) तुमुन् प्रत्ययः कुत्र भवति ? उदाहरणमेकं लिखत।

2. अधोलिखितानां ***पञ्चानां*** वाक्यानां वाच्यान्तरं क्रियताम्। 2×5 = 10

(क) शिशुः शेते।

(ख) तेन नदी दृष्टा।

(ग) अहं ग्रामं गच्छामि।

(घ) हरिः वेदान् पठति।

(ङ) त्वम् इदं करिष्यसि।

(च) बालकः फलानि भुक्तवान्।

(छ) ब्राह्मणः छागं गृहं नयति।

## SECTION-B

3. संस्कृतभाषायाम् अनुवादः कार्यः। 15

পৃথিবীতে জাগল নামক এক গ্রাম ছিল। সেখানে ধর্মবুদ্ধি ও দুষ্টবুদ্ধি নামে দুই বন্ধু ছিল। কোনও একদিন ধনাকাঙ্ক্ষায় তারা দেশান্তরে গেল। কিছু দিনের মধ্যেই প্রচুর ধন অর্জন করে নিজেদের গ্রামে আসতে আসতে পরস্পরে পরামর্শ করলো যে পিপ্পলী গাছের নীচে ধন (পুঁতে) রেখে অল্প কিছু গৃহে নিয়ে যেতে হবে। পরে গচ্ছিত ধন ভাগ করা যাবে।

There was a village in this world, Jagala by name. Two friends named Dharmabuddhi and Dustabuddhi lived there. On someday, they (two) went abroad for earning money. Within a short time (in some days) they earned much wealth. While returning to their own village, they consulted each other, keeping money beneath the Pipul tree, a little amount is to be taken home. Then gradually the treasure is to be divided.

**OR**

দুর্দান্ত নামে এক সিংহ মন্দার নামে একটি পাহাড়ে বাস করত। সে প্রতিদিন বনের বহু প্রাণীকে হত্যা করত। একদিন সমস্ত প্রাণী মিলিত হয়ে সিংহকে বলল — 'প্রভু, আপনি কেন এইভাবে সমস্ত জন্তুকে হত্যা করছেন ? আমরা আপনাকে প্রতিদিন খাবারের জন্য একটি করে পশু দেব'।

A lion, named Durdanta, dwelt on a mountain Mandara by name. He used to kill daily many beasts of the forest. One day, all the beasts being assembled and said to the lion – 'Lord, why are you killing all the beasts in this manner? We will give you one every day for food.'

## SECTION-C

4. अधोलिखितेषु विषयेषु ***यथेच्छमेकमवलम्ब्य*** संस्कृतभाषया प्रबन्धः लेख्यः। 15

(क) वनसृजनम्

(ख) संस्कृतं संस्कृतेर्मूलम्

(ग) महाकविः कालिदासः

———×———

## SECTION-B

3. संस्कृतभाषायाम् अनुवादः कार्यः। 15

পৃথিবীতে জাগল নামক এক গ্রাম ছিল। সেখানে ধর্মবুদ্ধি ও দুষ্টবুদ্ধি নামে দুই বন্ধু ছিল। কোনও একদিন ধনাকাঙ্ক্ষায় তারা দেশান্তরে গেল। কিছু দিনের মধ্যেই প্রচুর ধন অর্জন করে নিজেদের গ্রামে আসতে আসতে পরস্পরে পরামর্শ করলো যে পিপ্পলী গাছের নীচে ধন (পুঁতে) রেখে অল্প কিছু গৃহে নিয়ে যেতে হবে। পরে গচ্ছিত ধন ভাগ করা যাবে।

There was a village in this world, Jagala by name. Two friends named Dharmabuddhi and Dustabuddhi lived there. On someday, they (two) went abroad for earning money. Within a short time (in some days) they earned much wealth. While returning to their own village, they consulted each other, keeping money beneath the Pipul tree, a little amount is to be taken home. Then gradually the treasure is to be divided.

**OR**

দুর্দান্ত নামে এক সিংহ মন্দার নামে একটি পাহাড়ে বাস করত। সে প্রতিদিন বনের বহু প্রাণীকে হত্যা করত। একদিন সমস্ত প্রাণী মিলিত হয়ে সিংহকে বলল — 'প্রভু, আপনি কেন এইভাবে সমস্ত জন্তুকে হত্যা করছেন ? আমরা আপনাকে প্রতিদিন খাবারের জন্য একটি করে পশু দেব'।

A lion, named Durdanta, dwelt on a mountain Mandara by name. He used to kill daily many beasts of the forest. One day, all the beasts being assembled and said to the lion – 'Lord, why are you killing all the beasts in this manner? We will give you one every day for food.'

## SECTION-C

4. अधोलिखितेषु विषयेषु ***यथेच्छमेकमवलम्व्य*** संस्कृतभाषया प्रबन्धः लेख्यः। 15

(क) वनसृजनम्

(ख) संस्कृतं संस्कृतेर्मूलम्

(ग) महाकविः कालिदासः

——×——